

# श्रीधन्वन्तर्यष्टोत्तरशतनामावलिः

ॐ धन्वन्तरये नमः । ॐ सुधापूर्णकलशाढ्यकराय नमः ।
ॐ हरये नमः । ॐ जरामृतित्रस्तदेवप्रार्थनासाधकाय नमः ।
ॐ प्रभवे नमः । ॐ निर्विकल्पाय नमः ।
ॐ निस्समानाय नमः । ॐ मन्दस्मितमुखाम्बुजाय नमः ।
ॐ आञ्जनेयप्रापिताद्रये नमः । ॐ पार्श्वस्थविनतासुताय नमः ।
ॐ निमग्नमन्दरधराय नमः । ॐ कूर्मरूपिणे नमः ।
ॐ बृहत्तनवे नमः । ॐ नीलकुञ्चितकेशान्ताय नमः ।
ॐ परमाद्भुतरूपधृते नमः । ॐ कटाक्षवीक्षणाश्वस्तवासुकये नमः ।
ॐ सिंहविक्रमाय नमः । ॐ स्मर्तृहृद्रोगहरणाय नमः ।
ॐ महाविष्ण्वंशसम्भवाय नमः । ॐ प्रेक्षणीयोत्पलश्यामाय नमः ॥ २० ॥

ॐ आयुर्वेदाधिदैवताय नमः । ॐ भेषजग्रहणानेहस्स्मरणीयपदाम्बुजाय नमः ।
ॐ नवयौवनसम्पन्नाय नमः । ॐ किरीटान्वितमस्तकाय नमः ।
ॐ नक्रकुण्डलसंशोभिश्रवणद्वयशष्कुलये नमः । ॐ दीर्घपीवरदोर्दण्डाय नमः ।
ॐ कम्बुग्रीवाय नमः । ॐ अम्बुजेक्षणाय नमः ।
ॐ चतुर्भुजाय नमः । ॐ शङ्खधराय नमः ।
ॐ चक्रहस्ताय नमः । ॐ वरप्रदाय नमः ।
ॐ सुधापात्रे परिलसदाम्रपत्रलसत्कराय नमः । ॐ शतपद्याढ्यहस्ताय नमः ।
ॐ कस्तूरीतिलकाञ्चिताय नमः । ॐ सुकपोलाय नमः ।
ॐ सुनासाय नमः । ॐ सुन्दरभ्रूलताञ्चिताय नमः ।
ॐ स्वङ्गुलीतलशोभाढ्याय नमः । ॐ गूढजत्रवे नमः ॥ ४० ॥

ॐ महाहनवे नमः । ॐ दिव्याङ्गदलसद्बाहवे नमः ।
ॐ केयूरपरिशोभिताय नमः । ॐ विचित्ररत्नखचितवलयद्वयशोभिताय नमः ।
ॐ समोल्लसत्सुजातांसाय नमः । ॐ अङ्गुलीयविभूषिताय नमः ।
ॐ सुधागन्धरसास्वादमिलद्भृङ्गमनोहराय नमः ।
ॐ लक्ष्मीसमर्पितोत्फुल्लकञ्जमालालसद्गलाय नमः ।
ॐ लक्ष्मीशोभितवक्षस्काय नमः । ॐ वनमालाविराजिताय नमः ।
ॐ नवरत्नमणीक्लृप्तहारशोभितकन्धराय नमः ।
ॐ हीरनक्षत्रमालादिशोभारञ्जितदिङ्मुखाय नमः ।
ॐ विरजोऽम्बरसंवीताय नमः । ॐ विशालोरसे नमः ।
ॐ पृथुश्रवसे नमः । ॐ निम्ननाभये नमः ।
ॐ सूक्ष्ममध्याय नमः । ॐ स्थूलजङ्घाय नमः ।
ॐ निरञ्जनाय नमः । ॐ सुलक्षणपदाङ्गुष्ठाय नमः ॥ ६० ॥

ॐ सर्वसामुद्रिकान्विताय नमः । ॐ अलक्तकारक्तपादाय नमः ।
ॐ मूर्तिमद्वार्धिपूजिताय नमः ।
ॐ सुधार्थान्योन्यसंयुध्यद्देवदैतेयसान्त्वनाय नमः ।
ॐ कोटिमन्मथसङ्काशाय नमः । ॐ सर्वावयवसुन्दराय नमः ।
ॐ अमृतास्वादनोद्युक्तदेवसङ्घापरिष्टुताय नमः ।
ॐ पुष्पवर्षणसंयुक्तगन्धर्वकुलसेविताय नमः ।
ॐ शङ्खतूर्यमृदङ्गादिसुवादित्राप्सरोवृताय नमः । ॐ विष्वक्सेनादियुक्पार्श्वाय नमः ।
ॐ सनकादिमुनिस्तुताय नमः ।
ॐ साश्चर्यसस्मितचतुर्मुखनेत्रसमीक्षिताय नमः ।
ॐ साशङ्कसम्भ्रमदितिदनुवंश्यसमीडिताय नमः ।
ॐ नमनोन्मुखदेवादिमौलिरत्नलसत्पदाय नमः ।
ॐ दिव्यतेजःपुञ्जरूपाय नमः । ॐ सर्वदेवहितोत्सुकाय नमः ।
ॐ स्वनिर्गमक्षुब्धदुग्धवाराशये नमः । ॐ दुन्दुभिस्वनाय नमः ।
ॐ गन्धर्वगीतापदानश्रवणोत्कमहामनसे नमः । ॐ निष्किञ्चनजनप्रीताय नमः ॥ ८० ॥

ॐ भवसम्प्राप्तरोगहृते नमः ।

ॐ अन्तर्हितसुधापात्राय नमः

ॐ महात्मने नमः ।

ॐ मायिकाग्रण्यै नमः ।

ॐ क्षणार्धमोहिनीरूपाय नमः ।

ॐ सर्वस्त्रीशुभलक्षणाय नमः ।

ॐ मदमत्तेभगमनाय नमः ।

ॐ सर्वलोकविमोहनाय नमः ।

ॐ स्त्रंसन्नीवीग्रन्थिबन्धासक्तदिव्यकराङ्गुलये नमः ।

ॐ रत्नदर्वीलसद्धस्ताय नमः ।

ॐ देवदैत्यविभागकृते नमः ।

ॐ सङ्ख्यातदेवतान्यासाय नमः ।

ॐ दैत्यदानववञ्चकाय नमः ।

ॐ देवामृतप्रदात्रे नमः ।

ॐ परिवेषणहृष्टधिये नमः ।

ॐ उन्मुखोन्मुखदैत्येन्द्रदन्तपङ्क्तिविभाजकाय नमः ।

ॐ पुष्पवत्सुविनिर्दिष्टराहुरक्षःशिरोहराय नमः ।

ॐ राहुकेतुग्रहस्थानपश्चाद्गतिविधायकाय नमः ।

ॐ अमृतालाभनिर्विण्णयुध्यद्देवारिसूदनाय नमः ।

ॐ गरुत्मद्वाहनारूढाय नमः ॥ १०० ॥

ॐ सर्वेशस्तोत्रसंयुताय नमः ।

ॐ स्वस्वाधिकारसन्तुष्टशक्रवह्न्यादिपूजिताय नमः ।

ॐ मोहिनीदर्शनायातस्थाणुचित्तविमोहकाय नमः ।

ॐ शचीस्वाहादिदिक्पालपत्नीमण्डलसन्नुताय नमः ।

ॐ वेदान्तवेद्यमहिम्ने नमः ।

ॐ सर्वलोकैकरक्षकाय नमः ।

ॐ राजराजप्रपूज्याङ्घ्रये नमः ।

ॐ चिन्तितार्थप्रदायकाय नमः ॥ १०८ ॥

## इति श्रीधन्वन्तर्यष्टोत्तरशतनामावलिः समाप्तः

॥ ॐ ॥